योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः १०७

सप्तोत्तरशततमः सर्गः १०७

राजोवाच ।

बहुनात्र किमुक्तेन सोत्सवावर्जिताशयः ।

तदाप्रभृति तत्राहं संपन्नः पुष्टपुल्कसः ।। १

सप्तरात्रोत्सवस्यान्ते क्रमान्मासाष्टके गते ।

पुष्पिता सास्य संपन्ना स्थिता गर्भवती ततः ।। २

प्रसूता दुःखदां कन्यां विपद्दुःखक्रियामिव ।

सा कन्या ववृधे शीघ्रं मूर्खचिन्तेव पीवरी ।। ३

पुनः प्रसूता सा वर्षैस्त्रिभिः पुत्रमशोभनम् ।

अनर्थमिव दुर्बुद्धिराशापाशविधायकम् ।। ४

पुनः सुतां दुहितरं पुनरप्यर्भकं ततः ।

कलत्रवानहं जातो वने जरठपुल्कसः ।। ५

तया सह समास्तत्र मया बह्व्षोऽतिवाहिताः ।

नारके चिन्तया सार्धं ब्रह्मघ्नेनेव यातनाः ।। ६

शीतवातातपक्लेशविवशेन वनान्तरे ।

चिरं विलुलितं वृद्धकच्छपेनेव पल्वले ।। ७

कलत्रचिन्ताहृतया धिया संदह्यमानया ।

दृष्टाः कष्टसमारम्भा दिशः प्रज्वलिता इव ।। ८

क्षौमानेकसमाक्षीणपटे चेण्डकधारिणा ।

काष्ठभारो वने व्यूढो यो मूर्तमिव दुष्कृतम् ।। ९

यौकाकीर्णजरत्क्लिन्नगन्धिकौपीनवाससा ।

आश्वस्य धवलीकानां तले नीता घनाः समाः ।। १०

कलत्रापूरणोत्केन जर्जरेण हिमानिलैः ।

हेमन्ते दर्दुरेणेव विलीनं वनकुक्षिषु ।। ११

नानाकलहकल्लोलतापप्रसरविद्रुताः ।

बाष्पव्याजेन निर्मुक्ता नेत्राभ्यां रक्तबिन्दवः ।। १२

यामिन्यो विपिने क्लिन्ने वराहामिषभोजनाः ।

शिलातलकुटीकोशे नीता जलदविक्लवाः ।। १३

काले क्षयं गते रोहे कालाभ्रघनतां गते ।

असौहार्देन बन्धूनां कलहैश्चापि संततैः ।। १४

सर्वत्र जातशङ्केन कलाभिमुखरार्भकैः ।

मया कृपणचित्तेन नीताः परगृहे समाः ।। ११९

चण्डालीकलहोद्विग्नचण्डचण्डालतर्जनैः ।

मुखं जर्जरतां यातमिन्दू राहुरदैरिव ।। १६

चर्विताः खर्वितोष्ठेन द्वीपीपिशितपेशयः ।

नारकाहृतविक्रीता नारक्यो रशना इव ।। १७

हिमवत्कन्दरोद्गीर्णाश्चण्डा हेमन्तवीचयः ।

शिशिरे शीकरासारतुषारनिचयाश्चिरम् ।। १८

अङ्गे निरम्बरे सोढा मृत्युमुक्ता इवेषवः ।

जराजरठमूढेन मूलानि क्षीणभूरुहाम् ।। १९

सुकृतानामिवैकेन समुत्खातानि भूरिशः ।

शरावकेष्वटव्यां च पललं पक्वमादरात् ।। २०

अस्पृष्टेन जनैर्भुक्तं कुकलत्रवता मया ।

गृहीततेजःक्षतये बहुवक्रविकारिणा ।। २१

मार्गाविकमिवात्मीयं विक्रीतं पण्यमन्यतः ।

प्राण्यङ्गवपुषस्तस्य प्रोत्कृत्त्योत्कृत्त्य पेशलः ।। २२
आयसंपरि विक्रीता विन्ध्यपक्कणभूमिषु ।
जन्मान्तरसहस्रोत्थं स्वपापमिव वृद्धये ।। २३
अविकीर्णमसत्कीर्णं चण्डालारामभूमिषु ।
दृष्टः कुद्दालको दृष्ट्या संध्यास्नेहविमुक्तया ।। २४
रौरवापतितेनेव तत्कालस्निग्धतां गतः ।
विन्ध्यकन्दरगुल्मानां बन्धुत्वमिव गच्छता ।। २५
पुलिन्दवपुषा यत्र युक्तयोगैः समर्पिताः ।
तर्पिता लगुडाघातजितकौलेयरंहसा ।। २६
पुत्रदाराः कदन्नेन ग्रामकान्धोचितेन च ।
धारासाररणत्पत्रशुष्कतालतले निशाः ।। २७
नीता रणितदन्तेन सार्धं विपिनवानरैः ।
रोमभिः कोटिमुद्रोद्यैः शीतेनाध्युषितस्य मे ।। २८
वर्षासु मुक्ताकणवद्धृता वानलविन्दवः ।
अजाजीमूतखण्डार्थं क्षुत्क्षुण्णक्षीणकुक्षिणा ।। २९
कलत्रेण सहाटव्यां कृतः कलह आकुलः ।
वने रणितदन्तेन शीतकेकरचक्षुषा ।। ३०
मषीमलिनगात्रेण वेतालस्वजनायितम् ।
सरित्तीरेषु मत्स्यार्थं भ्रान्तं बडिशधारिणा ।। ३१
कल्पे जगत्सुनाशार्थं कृतान्तेनेव पाशिना ।
पीतं बहूपवासेन सद्यःकृत्तमृगोरसः ।। ३२
तत्कालकोष्णं रुधिरं मातुः स्तनपयो यथा ।
श्मशानसंस्थितान्मत्तो रक्तरक्तान्मलाशिनः ।। ३३
विद्रुता वनवेतालाश्चण्डिकाभिद्रुता इव ।
वागुरा विपिने व्युप्ता बन्धार्थं मृगपक्षिणाम् ।। ३४
आशा इव विवृद्ध्यर्थं पुत्रदारकलत्रजाः ।

मया मायामयैर्लोकाः सूत्रजालमयैः खगाः ।। ३५

जालैर्जर्जरता नीता दिशश्चासुकृतायुषा ।

तत्रापि दत्तः प्रसरो मनसो दुष्कृतोदये ।। ३६

आशा प्रसारिता दूरं प्रावृषीव तरङ्गिणी ।

करभ्या इव सर्पेण विद्रुतं दूरतो धिया ।। ३७

दूरे त्यक्ता दया देहे भुजङ्गेनेव कंचुकम् ।

क्रौर्यं सुखेन संरम्भशरवर्षिं निनादि च ।। ३८

अङ्गीकृतं निदाघान्ते नभसेवासिताम्बुदः ।

विकासिन्यो क्षताः क्षारा दूरं परिहृता जनैः ।। ३९

श्वभ्रेणेव कुमञ्जर्यश्चिरमूढा मयापदः ।

स्वकालकुलकोणासु नरकोद्दामभूमिषु ।। ४०

उप्ता दुष्कृतबीजानां मुष्टयो मोहवृष्टयः ।

वागुराभिर्मया विन्ध्यकन्दरस्थेन निर्दयम् ।। ४१

भूतेष्विव कृतान्तेन मृगेषु परिवल्गितम् ।

चामरीकण्ठकुड्येषु विश्रान्तशिरसा मया ।। ४२

सुप्तमस्तविवेकेन शेषाङ्गेष्विव शौरिणा ।

विलोलचरणाम्बरया सरावोल्लासिधूम्रया ।। ४३

मम तन्वा सनीहारविन्ध्यकच्छगुहायितम् ।

कृष्णदेहेन यौकाढ्याकन्थास्कन्धे मया चिरम् ।।४४

ग्रीष्मे सोढा चलद्धूता वराहेण यथोर्वरा ।

बहुशोऽहं वनोत्थाग्निनिर्दग्धप्राणिमण्डलः ।। ४५

कल्पाग्निभुक्तजगतः कालस्यानुगतिं गतः ।

लोभिलिङ्गो यथा रोगमनर्थानिव दुर्ग्रहः ।

प्रसूतास्तत्र मे दारा दुःखान्यथ सुखान्यपि ।। ४६

नृपालपुत्रकेनैकतनयेन तदा मया ।

नीता नीरन्ध्रदोषेण षष्टिः कल्पसमाः समाः ।। ४७

आक्रुष्टमुद्धुरतरं रुदितं विपत्सु

भुक्तं कदन्नमुषितं हतपक्कणेषु ।

कालान्तरं बहु मयोपहतेन तत्र

दुर्वासनानिगडबन्धगतेन सभ्याः ।। ४८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे इन्द्रजालोपाख्याने आपद्वर्णनं नाम सप्तोत्तरशततमः सर्गः।। १०७ ।।